Serving JinShasan
050892
gyanmandir@kobatirth.org

॥ श्रीजिनाय नमः ॥

( श्रीधर्मदासगणीकृत )

# ॥ जम्बूकुमार चरित्रम् ॥

मुद्रयित्वा प्रकाशकः-पण्डित हीरालाल हंसराज—( जामनगरवाळा )

संवत् १९९० किंमत रु. १-४-० सने १९३४

जैनभास्करोदय मुद्रणालय—जामनगर

आ. श्री कैलाससागरसूरि ज्ञान मंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीजम्बूकुमारचरित्रम् प्रारभ्यते. ॥

( गद्यबद्ध )

छपावी प्रसिद्ध करनारः—

पंडित श्रावक हीरालाल हंसराज. जामनगर.

एकदा राजगृहे श्रीवर्धमानः समवसृतः, श्रेणिको वन्दनार्थमागतः, तस्मिन्नवसरे कश्चित्सुरः प्रथमदेवलोकादागतः, सूर्याभवन्नाट्यं विधाय तेन निजायुःस्वरूपं पृष्टं, भगवतोक्तमितः सप्तमे दिने च्युत्वा त्वं मनुष्यभवं प्राप्स्यसि. इति श्रुत्वा स स्वस्थानं गतः, श्रेणिकेनोक्तं स्वामिन् कायमवतारं प्राप्स्यति ? वीरेणोक्तं राजगृहे जम्बूनामायमंतिमः केवली भविष्यति. श्रेणिकेनोक्तं प्रभो अस्य पूर्वभवस्वरूपं मे कथ्यतां ? भगवानाह जम्बूद्वीपे भरते सुग्रीवनामनि ग्रामे रावडनामा पामरोऽस्ति, तस्य रेवती पत्नी, तत्कुक्षिसमुत्पन्नौ भवदेवभावदेवौ द्वौ पुत्रौ. एकदा भवदेवेन दीक्षा गृहीता, स विहरन् एकदा निजग्रामे समागतः, नवपरिणीतां नागिलां स्त्रियं मुक्त्वा लज्जया भावदेवेनापि बन्धुसमीपे

आ. श्री कैलाससागर सूरि ज्ञान मंदिर
श्री महावीर जैन आराधना केन्द्र, कोबा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चारित्रं गृहीतं. भवदेवो मृत्वा स्वर्गं गतः, भावदेवो भवदेवमरणानन्तरं चारित्रभ्रष्टो जातः, लज्जां त्यक्त्वा नवपरिणीतां नागिलां संस्मरन् भोगाशया स गृहमागतः, ग्रामाद्बहिः प्रथमं जिनेश्वरप्रासादे स्थितः, एतस्मिन्नवसरे तपःकृशांगी नागिलापि जिनयात्रार्थं तत्रागता, तया स्वकीयः पतिरुपलक्षितः, इंगिताकारेण कामातुरश्च ज्ञातः।

नागिलया पृष्टं किमर्थं मुने आगतोऽसि, साधुरुवाच मदीया नागिला भार्या, तस्या हेतोः समागतोऽस्मि. लज्जया पूर्वं संयमो गृहीतः, परं प्रेमभावः कथं याति? नागिला यदि मिलति तदा सर्वमपि वांछितं फलति, नागिला कथयति चिंतामणिं मुक्त्वा कः कर्करं गृह्णाति? गजं विहाय को रासभारोहणं करोति ? प्रवहणं दूरे त्यक्त्वा को महतीं शिलामाश्रयति ? कः सुरतरुमुत्क्षिप्य धत्तूरतरुं वपति ? इत्याद्युपदेशं दत्वा तया स्वपतिर्वालितः, तेन स चारित्रे दृढो जातः, चारित्रं पालयित्वा तृतीये स्वर्गे सप्तसागरोपमायुर्देवो जातः, नागिलाप्येकावतारं कृत्वा मोक्षं गमिष्यति, भावदेवजीवस्ततश्च्युत्वा जम्बूद्वीपे पूर्वविदेहे वीतशोकानगर्यां पद्मरथनृपगृहे वनमालाराज्ञीकुक्षौ पुत्रत्वेनोत्पन्नः, तस्याभिधानं शिवकुमार इति, यौवनं प्राप्तः, पंचशतराजकन्यानां पाणिग्रहणं कारितं, एकस्मिन्नवसरे गवाक्षस्थितेन शिवकुमारेण कश्चित्साधुर्दृष्टः, गवाक्षादुत्तीर्य पृष्टं. किमर्थं क्लेशसहनं ? साधुनोक्तं धर्मनिमित्तं, शिवकुमारेणोक्तं कोऽयं धर्मः ? साधुनोक्तं श्रवणेच्छा चेदस्माकं गुरुसमीपे समागच्छ ? तेन सार्द्धं स धर्मघोषाचार्यसमीपे आगतः, धर्मं श्रुत्वा तेन जातिस्मरणं प्राप्तं, गुरुं नत्वा स गृहे आगतः, मातृपितृभ्यां दीक्षाज्ञा न दत्ता, गृहवासे एव षष्टभक्तं प्रतिदिनं करोति. पारणे चाचाम्लं करोति.



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

एवं द्वादशवर्षाणि यावत्तपस्तप्त्वा स प्रथमस्वर्गे चतुःपल्योपमायुर्विद्युन्माली नामा देवो जातः, इति चत्वारो भवा जम्बूस्वामिनो भगवता श्रेणिकाग्रे उक्ताः, ततः पञ्चमे भवे ततश्च्युत्वा राजगृहे नगरे ऋषभदत्तश्रेष्ठिनो गृहे धारिणीकुक्षौ शिवकुमारदेवः पुत्रत्वेनोत्पन्नः, स्वप्ने जम्बूतरुदर्शनाज्जंबूकुमार इति नाम स्थापितं. बाल्येऽपि तेन कलाः सकला अभ्यस्ताः, यौवनं प्राप्तं, अतीवरूपवान्, तरुणीहरिणा पाशरूपः, तस्मिन्नवसरे तन्नगरवासिभिरष्टाभिः श्रेष्ठिभिर्जंबूकुमाराय स्वकीयकन्यादानार्थं सत्यंकारः कृतोऽस्ति, एतस्मिन्नवसरे तत्र श्रीसुधर्मस्वामिगणभृत्समवसृतः, कोणिको वन्दनार्थं समागतः, ऋषभदत्तो जम्बूकुमारेण सार्द्धमागतः, श्रीसुधर्मापि भवदवतापोपशान्त्यर्थं पुष्करजलधारोपमां देशनां ददाति, संसारस्वरूपस्याऽनित्यता दर्शिता, यथा कामिनां मनश्चंचलं, यथा मूषागतं स्वर्णं, यथा जलसंक्रांतं विधुमंडलं, यथा वायुना हतो ध्वजप्रांतस्तद्वदस्थिरं भवस्वरूपं, यथांगुष्ठलालापानेन बालः सुखं मन्यते, तथाऽयमपि जीवो निंदितैर्भोगैः सुखं मन्यते, अहो! मुग्धत्वं लोकानां, यत्रोत्पन्नस्तत्रैवानुरक्तः, तानेव स्पर्शन् मनसि हृष्यति. इत्यादिदेशनां श्रुत्वा प्रतिबुद्धोः जम्बूकुमारः सुधर्माग्रे कथयति, स्वामिन् भवतारिणीं दीक्षां दत्वा मां निस्तारय? सुधर्मास्वामिनोक्तं हे देवानां प्रिय! मा प्रमादं कुरु? इति गुरुवचः श्रुत्वा गृहमागच्छन् स राजमार्गे समागतः, तत्र बहवो राजकुमाराः शास्त्राभ्यासं कुर्वंति, तत्रैको लोहगोलको जम्बूपार्श्वे समागत्य पतितः, जम्बूकुमारेण चिंतितं यद्ययं यंत्रगोलको ममालगिष्यत्तदा मनोवांछितं कथमभविष्यत्? एवं ज्ञात्वा पश्चादेत्य गुरुपार्श्वे तेन लघुदीक्षा गृहीता, पश्चात्स गृहमागतः, पित्रोश्चरणौ प्रणम्य कथयति, अहं दीक्षां गृहीष्यामि, अनित्योऽयं संसारः, किमनेन



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुटुंबेन ? अहमांतरे कुटुंबेऽनुरक्तोऽस्मि, अहमौदासीन्यगृहे वसिस्यामि, विरतिमातुः सेवां करिष्यामि, योगाभ्यासो मे पिता, समता धात्रीमाता, नीरागतैवाऽभीष्टा मम भगिनी, बन्धुर्विनय एवानुयायी, विवेक एवांगजः, सुमतिरेव प्राणप्रिया, ज्ञानमेवामृतं भोजनं, सम्यक्त्वमेवाक्षयो निधिः, अस्मिन् कुटुंबे ममानुरागः, तपस्तुरंगममारुह्य, भावना-कवचं परिधाय, अभयदानादिकैर्मंत्रिभिः सहितः संतोषसेनापतिमग्रेसरं कृत्वा, संयमगुणसेनां सज्जीकृत्य क्षपकश्रे-णिरूपया गजघटया परिवृतो गुर्वाज्ञामेव शिरस्त्राणं धृत्वा, धर्मध्यानासिना आंतरां दुःखदायिनीं मोहसेनां हनिष्या-मीति पुत्रवचनं श्रुत्वा पितरौ प्राहतुः—

हे पुत्र एकवारमष्टौ कन्याः परिणय? पश्चाद्व्रतमंगीकुरु? अस्मदीयं मनोरथं पूरय ? इति पितृवचसा तेन पाणि-ग्रहणमष्टानां कन्यानां कृतं, परं मनसा निर्विकारः, एकैकया कन्यया नवनवकोट्यः स्वर्णानामानीताः, अष्टौ कोट्यो ऽष्टकन्यानां मातुलपक्षत आगताः, एका कोटिर्जंबूकुमारस्य मातुलपक्षतः, एवमेकाशीतिकोट्यः स्वर्णानां, अष्टादश-कोट्यः स्वगृहस्थाः, एवं नवनवतिकोटिस्वर्णानामधिपतिर्जंबूकुमारो रंगशालायां रात्रौ स्त्रीभिःसार्द्धं स्थितः, किं तु न स रागदृष्ट्या विलोकयति, न च वचनेनापि संतोषयति सरागवचनैश्चालितोऽपि न चलति, तस्मिन्नवसरे प्रभवनामा चौरो जम्बुगृहे समागतः, पञ्चशतचौरपरिवृतः कञ्चनकोटिं गृह्णातिस्म. ग्रंथीन् बध्ध्वा मस्तके लात्वा ते यावन्निर्गच्छंति तावज्जंबूकुमारेण स्मृतनमस्कारमन्त्रमाहात्म्यात्सर्वेऽपि ते स्तंभिताः, भित्तिलिखितचित्राणीव स्थिताः, तदा प्रभवेणोक्तं हे जम्बूकुमार ! त्वं जीवदयाप्रतिपालकोऽसि, अभयदानात्परमन्यत्पुण्यं नास्ति, प्रातःकाले कोणिकः सर्वानप्यस्मान्



श्री० जै० श्वे० बोटा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मारयिष्यति. अतो मुञ्च मुञ्चास्मान् ? गृहाण मदीये तालोद्घाटिन्यवस्वापिन्यौ विद्ये ? अर्पयैकां त्वदीयां स्तंभिनीं विद्यां ? जम्बूकुमारेणोक्तं ममैका धर्मकला महती विद्यास्ति, अपराः सर्वा अपि कुविद्याः, अहं तृणवद्भोगानपहाय व्रतं प्रातर्गृहीष्यामि, इमे भोगा मधुबिन्दूपमाः, प्रभवेणोक्तं मधुबिन्दुदृष्टांतं मे कथय ? जम्बूकुमारः कथयति—एकस्मिन्नरण्ये सार्थभ्रष्टः कश्चिन्नरो वने परिभ्रमति, एतस्मिनवसरे आरण्यो हस्ती हननाय सन्मुखं धावितः, स प्रणष्टः, हस्ती पश्चाल्लग्नः, अग्रे गत्वा गजभयात् कूपमध्ये स्थितां वटशाखामाश्रित्य लम्बायमानः स्थितः, तस्याधस्ताद्विकासितमुखौ द्वावजगरौ वर्त्तेते. कूपकस्य चतुर्षु पार्श्वेषु चत्वारो लम्बकायाः स्थिताः संति, शाखायां रसपूरितो मधुमंडपो वर्त्तते. द्वौ मूषकौ तां शाखां कर्त्तयतः, मधुमंडपान्निर्गता मक्षिकास्तं दशंति, एवं कष्टमापन्नः स मूढश्चिरकालेन मधुबिन्दुं मुखे प्राप्य तदास्वादसुखितस्तत्रास्ते. एतस्मिन्नवसरे कश्चिद्विद्याधरः समागतः, तेनोक्तं अस्मिन् विमाने समागच्छ ? दुःखान्निष्कासयामि. मूर्खो वक्ति क्षणं यावत्प्रतीक्षस्व ? एकं बिन्दुमास्वद्यागच्छामि, स विद्याधरो गतः, मूर्खो दुःखं प्राप्तः, एवं हे प्रभव ! मधुबिन्दुसदृशोऽयं विषयविपाकः, अत्रोपनयः—भव एव महत्यटवी, जीवो रंकतुल्यः, जरामरणावतरणरूपोऽयं कूपः, विषयजलेन पूर्णः, नरकगतितिर्यग्गतिरूपावजगरौ, कषाया विषधराः, आयुरेव वटशाखा, द्वौ पक्षौ द्वौ मूषकौ, मृत्युरेव गजः, विषयो मधुमंडपस्थानीयः, तस्य स्पृहां कुर्वन्नयं जीवो रोगशोकवियोगाद्यनेकानुपद्रवान् सहते, अतो धर्म एव महत्सुखं, विद्याधरस्थानीयो गुरुः ॥ इति मधुबिन्दूपनयः ॥ पुनरपि प्रभवः कथयति, यौवनवयसि पुत्रकलत्रादि सकलपरिवारस्त्यक्तुं न योग्यः, जम्बूकुमारेणोक्तं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एकैकस्य जीवस्य परस्परमनंतशः सम्बन्धो जातः, यथाऽष्टादशनातरासम्बन्धः, प्रभवेणोक्तं तदष्टादशसम्बन्धस्वरूपं मे कथ्यतां ? जम्बूः कथयति—

मथुरापुर्यां कुबेरसेना वेश्या, तस्याः कुक्षावेकं युगलं जातं, इकस्य कुबेरदत्त इति, अपरस्याश्च कुबेरदत्तेति नाम प्रतिष्ठितं, तद्युगलं मुद्रालंकृतं वस्त्रेण वेष्टयित्वा मन्जूषायां च निक्षिप्य यमुनाप्रवाहे प्रवाहितं. प्रातः सा मन्जूषा सोरीपुरं गता, द्वाभ्यां श्रेष्ठिभ्यां निष्कासिता, एकेन पुत्रो गृहीतोऽन्येन च पुत्री गृहीता, यौवनं प्राप्तौ, कर्मयोगात्तयोरेव परस्परं विवाहो जातः, सारिपाशकक्रीडां कुर्वत्या कुबेरदत्तया पतिहस्ते मुद्रा दृष्टा, स्वकीयं भ्रातरमुपलक्ष्य विरक्ता सा संयमं जग्राह, अवधिज्ञानं प्राप्ता. एतस्मिन्नवसरे कुबेरदत्तः कार्यार्थं मथुरां गतः, कुबेरसेनया मात्रा सार्धं च लग्नः, एकः पुत्रो जातः, कुबेरदत्तासाध्व्या ज्ञानेन ज्ञातं महाऽनर्थो जायते. तत्प्रतिबोधार्थं सा तत्रागत्य वेश्यागृहे समागता. रोदनं कुर्वतो बालस्य पार्श्वे आगता, साध्वी कथयति रे बालक ! कथं रोदिषि ? मौनं गृहाण ? त्वं ममाभीष्टोऽसि, त्वया सार्द्धं मम षट् सम्बन्धा वर्त्तते, त्वं मम पुत्रः १ त्वं मम भ्रातृपुत्रः २ त्वं मम बन्धुः ३ त्वं देवरः ४ त्वं मम पितृभ्राता ५ त्वं मम पौत्रः ६ एवं षट् सम्बन्धाः पुनर्हे वत्स! तव जनकेनापि सार्धं मम षट् सम्बन्धाः, स मम पतिः १ मम पिता २ मम बन्धुः ३ मम ज्येष्ठः ४ ममश्वशुरः ५ मम पुत्रश्च ६ एवं तव मात्रापि सार्धं षट् सम्बन्धाः, सा मम भ्रातृजाया १ मम सपत्नी २ मम माता ३ मम श्वश्रूः ४ मम वधूः ५ मम वृद्धमाता च ६. इति साध्वीवचनं श्रुत्वा पूर्वभवस्वरूपं ज्ञात्वा कुबेरसेनया व्रतं गृहीतं, भवपारं च प्राप्ता. एवं हे प्रभव ! अस्मिन् सन्सारेऽनंतशः सम्बन्धा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जाताः, कस्य कः ? अतो धर्म एव परमबन्धुः. ॥ इत्याष्टादशसम्बन्धदृष्टांतः ॥ प्रभवः पुनरपि कथयति हे जम्बू ! त्वया यदुक्तं तत्सत्यं, परं–अपुत्रस्य गतिर्नास्ति। स्वर्गो नैव च नैव च ॥तस्मात्पुत्रमुखं दृष्ट्वा। स्वर्गं गच्छति मानवः ॥ १ ॥ इति पुराणवाक्यं, अतो भोगान् भुंक्त्वा सुतं गृहे स्थापयित्वा संयमे मनो रक्ष ? जम्बूः प्राह न हि सुतेन सुगतिकुगत्योर्विपर्ययः, सांसारिकजीवानां केवलं मोहभ्रम एवायं. यथा महेश्वरदत्तस्य पुत्रः कार्ये नागतः, प्रभवेण पृष्टं कोऽसौ महेश्वरदत्तः ? जम्बू प्राह विजयपुरे नगरे महेश्वरदत्तः श्रेष्ठी, तस्य महेश्वरनामा पुत्रः, मरणवेलायां महेश्वरदत्तेनोक्तं मम श्राद्धदिने एकं महिषं हत्वा तदीयेनामिषेण सर्वोऽपि परिजनः पोषितव्यः, स मृतः, पुत्रेण पितृवचनं धारितं. स मृत्वा वनमध्ये महिषो जातः, महेश्वरमाता गृहमोहेन मृत्वा गृहे कुर्कुरी जाता. एवं दैवयोगात्स एव महिष आनीतः, अथ महेश्वरस्य स्त्री कुलटा, तया सह रममाणो जारपुरुषो महेश्वरेण मारितः, स मृत्वा तद्गृहे पुत्रत्वेनोत्पन्नः, स लाल्यमानोऽस्ति, स महिषो मारितः, कुटुंबेन तन्मांसं भक्षितं, एतस्मिन्प्रस्तावे श्रीधर्मघोषनामा मुनिर्गोचर्यां तत्रागतः, तद्गृहचरितं ज्ञानेन ज्ञात्वा भणितं—मारितो वल्लभो जातः। पिता पुत्रेण भक्षितः ॥ जननी ताड्यते सेय–महो मोहविजृंभितं ॥ १ ॥ एवं श्लोकं श्रुत्वा महेश्वरेणोक्तं स्वामिन् किमेतत् ? साधुना सर्वमपि कथितं स न मन्यते, कुर्कुरीपार्श्वान्निधानदर्शनेन प्रत्यय उत्पादितः, ततो महेश्वरः श्राद्धं मुक्त्वा श्राद्धो जातः, कुर्कुर्यपि जातिस्मरणं प्राप्य मिथ्यात्वं त्यक्त्वा स्वर्गं गता. अतो हे प्रभव ! पुत्रेण का सिद्धिः ? इति महेश्वरदत्तदृष्टांतस्तृतीयः ॥ ३ ॥



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

प्रभवः प्राह हे जम्बू ! तवैतत्प्रथमं पुण्यं यन्मम जीवितदानं दत्तं, ममायं च परिवारो यदि बन्धान्मोक्षं प्राप्नोति, तदाहमपि तव सार्थे चारित्रं गृहीष्यामीति निश्चयं श्रुत्वा समुद्रश्रीनामा प्रथमस्त्री भणति, हे प्रभव ! भवादृशां दुःकर्मकारिणां चारित्रं घटते, दुःखीनः सुखापेक्षया चारित्रं गृह्णंति, परन्तु सुखिनां संयमकष्टमनिष्टं, प्रायेण लोकाः परगृहभंजका भवंति, हे प्रभव यदि तव कथनादयं व्रतं गृहीष्यति, तर्हि हालिकस्येव स पश्चात्तापं प्राप्स्यति. प्रभवेणोक्तं कोऽयं हालिकः ? समुद्रश्रीः कथयति—

मरुमंडले बगनामा पामरो वसति, स कृषिकर्म करोति, कोद्रवकंगुप्रमुखं धान्यं च वपति, स एकदा पुत्र्याः श्वशुरगृहे गतः, स तत्र मिष्टैर्गुडमंडकैर्भोजितः, स इक्षुतो गुडोत्पत्तिं ज्ञात्वा स्वगृहे समागत्य पुष्पितं फलितं क्षेत्रमुन्मूल्येक्षुखन्डं वपतिस्म. स्त्रिया वारितोऽपि न स्थितः, आत्ममतिको जातः, ईक्षुक्षेत्रं तु न निष्पन्नं, पुरातनमपि धान्यं गतं, मनसि पश्चात्तापं कृतवान्, मिष्टभोजनाशया पूरातनमपि गतं तद्वत्. हे प्राणवल्लभ ! त्वमपि पश्चात्तापं प्राप्स्यसि, प्राप्तं सुखं मुक्त्वाधिकस्य वांछा न कर्त्तव्या. ॥ इति बगपामरदृष्टांतः ॥४॥ जम्बूकुमारः कथयति हे प्रिये यत्त्वयोक्तं तत्सत्यं, परं ये ऐहिकसुखाभिलाषिणस्ते दुःखं प्राप्नुवन्ति, ज्ञानात्परं धनं न, समतासदृशं सुखं न, जीवितसममाशीर्वचनं न, लोभसदृशं दुःखं न आशासदृशं बन्धनं न, स्त्रीसदृशं च जालबन्धनं न वर्तते, यस्तासु स्त्रीष्वतीवलोभवान् स वायस इवानर्थं प्राप्नोति. स्त्रिया पृष्टं कोऽयं वायसः ? जम्बूकुमारः कथयति—

भृगुकच्छे रेवानदीतीरे एको गजो मृतः, तत्र बहवः काका मिलिताः सन्ति, गमनागमनं च कुर्वंति, यथा सत्र-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शालायां द्विजा मिलन्ति, तद्वत्तत्र वायसा मिलिताः सन्ति, तत्रैको वायसो मृतगजकलेवरस्याऽवमद्वारे प्रविष्टः, तत्रैव च स तिष्ठत्यामिषलंपटः, तत्र ग्रीष्मकाले द्वारं मिलितं,काकस्तु तत्रैव स्थितः, वर्षाकाले तद्गजकलेवरं पानीयप्रवाहेण वाहितं, अवमद्वारविकसनात्स वराको निःसृतः, चतुर्दिक्षु पानीयपूरं विलोकयन् तत्रैव मरणमापन्नः, अत्रोपनयः— मृतगजकलेवरतुल्याः कामिन्यः, विषयी नरो वायसतुल्यः, स भवजले ब्रुडति, एवं बहुलोभेन शोकं प्राप्नोति. ॥ इति वायसदृष्टांतः. प्रथमस्त्रीकथा ॥

अथ द्वितीया पद्मश्रीः कथयति—हे स्वामिन्नतिलोभेन वानर इव नरो दुःखं प्राप्नोति, प्रभवचौरः कथयति तं वानरदृष्टांतं कथय ? पद्मश्रीः कथयति एकस्मिन् वने कपियुगं वसति सुखेन च तिष्ठति, एकस्मिन् दिने देवाधिष्ठिते जलह्रदे स वानरः पतितः, मानवरूपं च प्राप्तः, वानर्यपि पतिता स्त्रीरूपा जाता:, वानरेणोक्तमेकवारं ह्रदे पतनेन मनुष्यत्वं प्राप्तं, द्वितीयवारं पतनेन च देवत्वं प्राप्स्यामि, स्त्रिया वारितोऽपि पतितः, पुनरपि वानररूपं प्राप्तः, अस्मिन्नवसरे केनचिद्राज्ञा दिव्यरूपा सा स्त्री स्वगृहमानीता, स वानरश्च कस्यचिन्नटस्य हस्ते चटितः, तेन नृत्ये योजितः, स वानरो नाट्यं कुर्वन् राजद्वारे समागतः, वानरो निजस्त्रियं दृष्ट्वाऽतीवदुःखं चकारेति दृष्टांतः ॥ इति वानरदृष्टांतः ॥ जम्बूः कथयति हे प्रियेऽनेन जीवेनानंतशो देवभोगा अनुभूतास्तथापि न तृप्तः, तर्हि मानुष्यसुखं कियन्मात्रं, यथैगालिकेन वनमध्यंगतेन मध्याह्नसमये पिपासातुरेण सर्वाणि जलभाजनानि निष्ठापितानि, परं तस्य पिपासा न गता, स तरुच्छायायां सुप्तः, स्वप्ने समुद्रनदीजलं पीतं, परं स न तृप्तः, एकप्रदेशे कर्दमयुतं जलं मुखे दत्तं, तथापि न



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तुष्टः, समुद्रजलेन तृप्तिं न प्राप्तस्तर्हि कर्दमेन कुतः ? समुद्रजलोपमाः सुरभोगाः, कर्दमजलतुल्याश्च मानुषीतनुभोगाः ॥ इति कबाडीदृष्टांतः ॥ इति द्वितीयस्त्रीकथा ॥

तृतीयया प्रद्मसेनया कथितं सहसात्कारेण कार्यकरणेन नूपुरपंडितावत्पश्चात्तापो भविष्यति, अत्र नूपुरपन्डितादृष्टांतो वाच्यः, तदुपरि जम्बूकुमारेण विद्युन्मालिदृष्टांतः कथितः, येन मातंगीसंगमेन सर्वा अपि विद्या हारिताः, स चायं—भरते कुशवर्धनग्रामे विप्रकुले विद्युन्मालिमेघरथनामानौ बांधवौ. एकदा वने गतौ, केनचिद्विद्याधरेण मातंगी विद्या दत्ता. विद्याधरेणोक्तं सा मातंगी देवी भोगप्रार्थनां करिष्यति परं मनसि धैर्यं रक्षणीयं न चलितव्यं, तदा विद्या सिद्धिं प्राप्स्यति. द्वौ बांधवौ साधयितुं लग्नौ. तत्रैको विह्वलमना विद्युन्माली मातंग्या चालितः, अन्यस्तु गुरुवचनं स्मृत्वा न चलितः, तस्य विद्या सिद्धा, षण्मासमध्ये तेन बहु धनं प्राप्तं, विद्युन्माली तु दुःखी जातः, जम्बूकुमारेणोक्तं मातंगीसंगतिसदृशा मानुष्यस्त्रीभोगाः, अतो बहुसुखार्थिना ते त्याज्याः ॥ इति तृतीयस्त्रीकथा ॥ अथ चतुर्थी कनकसेना कथयति—

यदि मातंगीसदृशा वयं तर्हि कथं परिणीताः ? पानीयं पीत्वा गृहपृच्छा न कर्तव्या. हे स्वामिन् त्वमपि कौटुंबिकवल्लोभेन पश्चात्तापं प्राप्स्यसि. दृष्टांतश्चायं—सुरपुरे एकः कौटुंबिको वसति, तेन कृषिकर्म कृतं, रात्रौ पक्षिणां पलायनार्थं शंखं वादयति, एकस्मिन् दिने तस्करा गोधनं गृहीत्वा तत्क्षेत्रपार्श्वे समागताः. शंखध्वनिं च श्रुत्वा भयातुराः पशून् मुक्त्वा गताः, स कौटुंबिकः पशून् विक्रीय सुखी जातः, एवं वारत्रयं जातं. एकदा तैस्तस्करैस्तत्कौटुं-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विकवृत्तांतो ज्ञातः, ते आगताः, कौटुंबिको बद्धः, प्रहारेण च सरलः कृतः, एवं स्वामिन् अतिलोभाभिभूता दुःखं प्राप्नुवन्ति ॥ इति शंखधमककौटुंबिकदृष्टांतः ॥ जम्बूकुमारः कथयति अतिकामालालसा वानरवद् बन्धनं प्राप्नुवन्ति, वानरदृष्टांतस्त्वयं—एको वानरो ग्रीष्मकाले तृषातुरो जलभ्रांत्या चिक्कणे जलरहिते कर्द्दमे पतितः, यथा यथा शरीरे कर्दमस्पर्शो जायते तथा तथा शीतलमंगं भवति, समग्रं शरीरं कर्द्दमेन लिप्तं, तथापि तृषा न गता, सूर्यातपयोगेन कर्दमः शुष्कः, शरीरे पीडा जाता, तद्वत् हे प्रिये विषयसुखकर्द्दमेनाहं शरीरं न लिम्पयामीति वानरदृष्टांतः ॥ चतुर्थी स्त्री नभसेना कथयति—

हे स्वामिन् अतिलोभो न कर्तव्यः, अतिलोभेन बुद्धिरंधतां गता, तदुपरि सिद्धिबुध्ध्योर्दृष्टांतो वाच्यः. जम्बूकुमारः कथयति हे प्रिये ! बहुकथनेनापि अहं जात्यतुरंगम इवोत्पथेन न व्रजामि, जात्यतुरंगमदृष्टांतस्त्वयं—वसन्तपुरे नगरे जितशत्रुराजा, तस्य गृहे एकस्तुरंगमः, स घोटको जिनदत्तश्रावकगृहे मुक्तः, स चातीवलक्षणोपेतः, एकदा केनचित्पल्लीपतिना तद्घोटकगृहणार्थमेको निजसेवको मुक्तः, तेन क्षात्रं दत्वा स घोटको निष्कासितः, परन्तु स घोटको न चलति, उत्पथं न गच्छति, अनुभूतं राजमार्गं विनाऽन्यमार्गे न गच्छति. एतस्मिन्नवसरे श्रेष्ठिना ज्ञातं, चौरो बद्धः, घोटकश्च, गृहीतः, चौरोऽपि मुक्तः, एवं हे प्रियेऽहमपि स घोटक इव शुद्धं संयममार्गं मुक्त्वा चौरसदृशीभिर्भवतीभिराकृष्यमाण उत्पथेन गच्छामि. ॥ इति तुरंगमदृष्टांतः ॥

पञ्चमी स्त्री कनकश्रीः कथयति हे प्रिय अतिहठग्रहणं न युक्तं, आयतिर्विचारणीया, द्विजपुत्र इव रासभपुच्छं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न गृहीतव्यं. प्रभवेणोक्तं कोऽयं द्विजः ? स्त्री कथयति एकस्मिन् कुलग्रामे एको द्विजपुत्रः, सोऽतीवमूर्खः, तस्य माता कथयति हे पुत्र ! यद्गृहीतं तन्न मोचनीयं, एतत्पन्डितस्य लक्षणं. तेन मूर्खेण जननीवचनं धारितं, एकस्मिन् दिने कुंभकारगृहीत एको रासभो नष्टः, पश्चाद्भूतेन कुंभकारेण द्विजपुत्रस्य कथितं, अहो एनं खरं गृहाण ? मूर्खेण रासभस्य पुच्छं गृहीतं, रासभश्चरणलत्तां ददाति, तथापि स पुच्छं न मुञ्चति, लोकैरुक्तं भो मूर्ख ! पुच्छं मुञ्च मुञ्च ? तेनोक्तं मम मात्रा शिक्षा दत्तास्ति यद्गृहीतं तन्न मोचनीयं. स मूर्खो निजकदाग्रहेण कष्टं प्राप्तः ॥ इति विप्रपुत्र-दृष्टांतः ॥ जम्बूकुमारः कथयति हे प्रिये एतत्सत्यं खरसदृश्यो भवत्यः, भवतीनामंगीकरणं खरपुच्छग्रहणतुल्यं, लज्जास्थानेन परिणीतानां एतद्वाक्यं न युक्तं, एतानि वचनानि स सहते यस्य स्थानं न भवति, यो विप्र इव ऋणधारी भवति स दासो भूत्वा तद्गृहे तिष्टति, विप्रदृष्टांतस्त्वयं—कुशस्थलपुरे एकः क्षत्रियः तस्य गृहे एका तुरगी, तस्याः सेवार्थमेको नरश्च रक्षितः, स नरोऽहर्निशं तुरगी निमित्तं यदशनादि, तन्मध्यात्स्वयमपि प्रच्छन्नवृत्त्या भक्षयति. सा तुरगी कृशशरीरा जाता, क्रमेण च मरणं प्राप्य तस्मिन्नेव नगरे वेश्या जाता. स नरश्च विप्रकुले समुत्पन्नः, एकस्मिन् दिने तेन सा वेश्या दृष्टा, पूर्वभवसम्बन्धात्स तद् गृहे दासो भूत्वा स्थितः, गृहकर्म च करोति. तद्वदहमपि भोगा-शया दासो न भवामीति तुरगीकथा षष्टी ॥ सप्तमी रूपश्रीः कथयति, हे स्वामिन्नधुनाऽस्मदीयं कथनं न क्रियते परं पश्चान्मासाहसपक्षिवदात्मना दुःखं प्राप्स्यसि. यथैको मासाहसनामा पक्षी वने वसति, स पक्षी सुप्तव्याघ्रमुखे प्रविश्य दंष्ट्रायां स्थितं मांसपिंड गृहीत्वा बहीरागत्येवं वदति 'मा साहसं कुर्यात्' एवं स वदति परं करोति, पक्षि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भिर्वारितोऽपि मांसलोलुपी पुनः पुनर्दंष्ट्रायां प्रविशति, स पक्षी व्याघ्रेण कवलित इति मासाहसपक्षिदृष्टांतः ॥ जम्बूकुमारः कथयति धर्ममित्रमेव शरणे रक्षति, यथा प्रधानस्य धर्ममित्रेण साहाय्यं दत्तं. दृष्टांतश्चायं—सुग्रीवपूरे जितशत्रुराजा, सुबुद्धिश्च मन्त्री, तस्य त्रीणि मित्राणि, एको नित्यमित्रः, द्वितीयः पर्वमित्रस्तृतीयस्तु जुहारमित्रः, इत्यवगत मेतत्. तदुपरि श्लोकोऽयं—नित्यमित्रसमो देहः । स्वजनाः पर्वसन्निभाः ॥ जुहारमित्रसमो ज्ञेयो । धर्मः परमबांधवः ॥ १ ॥ इति मित्रत्रयदृष्टांतः ॥ इति सप्तमी कथा ॥

अथ धनावहश्रेष्ठिनः पुत्री जयन्तश्रीनामा स्वं भर्त्तारं विज्ञपयति, हे स्वामिन् कोऽयं वचनविवादः ? भवद्भिः साकं नवपरिणीतानामस्माकं वक्तुं न युक्तं, परं किं कल्पितवार्त्तया विप्रतारयसि ? भवद्भिर्या याः कथाः कथितास्ताः सर्वा अपि कल्पिता एव, यथा ब्राह्मणपुत्र्या कल्पितवार्त्तया राज्ञो मनो रञ्जितं, तथा त्वमप्यस्माकं कल्पितवार्त्ताभिर्मनोरञ्जनं करोषि. तस्मिन्नवसरे सर्वाभिरपि कथितं भो जयन्तश्रि तां कथां कथय ? यां कथां श्रुत्वा प्रियतमो गृहे तिष्ठति. जयन्तश्रीः कथयति, सावधानाः शृणुत ? भरतक्षेत्रे लक्ष्मीपुरनगरे नयसारनामा राजा राज्यं करोति, स राजा गीतकथानाटिकप्रहेलिकांतर्लापिकादिष्वतीवनिपुणः, नवीनकथाश्रवणरसिकः प्रत्यहं नवीनां नवीनां वार्त्तां जनमुखात् शृणोति. एकदा तेन राज्ञा नगरे पटहो वादितो यत्सर्वैरपि लोकैर्वारकेण राज्ञोऽग्रे नवीना कथा कथनीया. एतद्राज्ञोवाक्यं श्रुत्वा यस्य वारकः समायाति स राज्ञोऽग्रे गत्वा कथां कथयति. एकदावसरे एकस्य ब्राह्मणस्य वारकः समायातः स ब्राह्मणोऽतीवमूर्खत्वात् कथां वक्तुं न जानाति. तद्गृहे एका पुत्री वर्त्तते, साऽतीवचतुरा, तया



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

पितुरुक्तं त्वं निश्चितो भव ? अहं राज्ञोऽग्रे गत्वा नवीनां कथां कथयिष्यामीति राज्ञोऽग्रे गता, राज्ञा पृष्टं भो पुत्रि ? कथां कथय ? यथा मन्मनोरंजनं जायते. ब्राह्मणपुत्र्या कथितं हे राजन् ! स्वानुभूतामेव वार्तां कथयामि, सावधानतया शृणु ? हे स्वामिन्नहं पितृगृहे नवयौवनवती जाता, तदा पित्रा सदृशकुलोत्पन्नेन ब्राह्मणपुत्रेण सार्द्धं मदीयो विवाहो मेलितः, स नवीनमेलितविवाहो मदीयो भर्त्ता मदीयरूपविलोकनार्थं मद्गृहे समायातः, तस्मिन्नवसरे मे मातापितरौ क्षेत्रं गतौ, अहमेकाकिनी गृहे स्थिता. मया सम्यक्स्नानभोजनादिना स भर्त्ताऽतीवसन्तोषितः, सोऽपि भर्त्ता मदीयामद्भुतं रूपं दृष्ट्वाऽतीवकामाज्वरपीडितो जातः, पल्यंकोपरि स्थितोंगमोटनं करोति सरागवचनं वदति, पुनः पुनर्मामवलोकयति. मया तदीयोऽभिप्रायो ज्ञातः, तदा मया कथितं भो कांत ! त्वरा न विधेया, पाणिग्रहणं विना विषयादिकृत्यं न भवति. अतिबुभुक्षितोऽपि पुमान् किं करद्वयेन भुंक्ते ? ततोऽधुना विषयसेवनं न युक्तमेवेति मदीयवाक्यं श्रुत्वाऽतीवकामातुरस्य तस्य कुक्षौ शूलं समुत्पन्नं, तेन व्याधिना च स मदीयो भर्त्ता मृतः, तदा मया स गृहमध्ये भूमौ निक्षिप्तः, केनापि न ज्ञातं, मात्रा पित्रापि न ज्ञातं. हे स्वामिन्नियं मदीयाऽनुभूता वार्त्ता कथिता. तां श्रुत्वा राजातीवसन्तुष्टो जातः, सा कन्या गृहे समायाता. जयन्तश्रीः कथयति यथा तया कल्पितवार्त्तया राज्ञो मनो रञ्जितं, तद्वत्त्वमप्यस्माकं मनोरञ्जयसि, परन्तु मिथ्यैवेयं प्रवृत्तिः, अतो यः स्वकीयं चरणं विचार्य धरिष्यति तस्य लज्जा स्थास्यति, अतो हे स्वामिन् भुक्तभोगी भूत्वा पश्चाच्चारित्रं गृहीत्वाऽऽत्मार्थः साधनीयः। इति ब्राह्मणपुत्रीदृष्टांतः। इति जयन्तश्रीवाक्यं श्रुत्वा जम्बूकुमारः प्राह—भो जयन्तश्रि मोहातुरमनाः प्राणी अधर्मे धर्मबुद्धिं निधाय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विषयादिकं स्थापयन् कर्माणि बध्नाति, अहो ! दुरन्ता विषयाः, विषेभ्योऽप्यधिका विषया इति सत्यमेव. विषया मृतानपि मारयन्ति. यदुक्तं–भिक्षाशनं तदपि नीरसमेकवारं । शय्या च भूः परिजनो निजदेहमात्रं ॥ वस्त्रं च जीर्णशतखन्डमयी च कन्या । हा हा तथापि विषया न परित्यजन्ति ॥ १ ॥ अतो भो वनिता यदि जन्मजरामरणवियोगशोकादयः शत्रवो मत्समीपं नायांति तदाहं भवत्संबन्धिनो भोगानभिलषामि, यथा मां बलात्कारेण गृहे स्थापयथ, तथा रोगादिभ्योऽपि रक्षणे किं शक्तिरस्ति ? तदा स्त्रीभिरुक्तं स्वामिन्नेतादृशः कः समर्थो यः संसारस्थितिं वारयति; तदा जम्बूकुमारेणोक्तमहमशुचिभृतायां मोहकुंडिकायां भवदीयायां तनौ न रतिं प्राप्नोमि, यतोऽनंतपापराशिभवः स्त्रीणां भवनिबन्धः, यदुक्तं—अणंता पावरासीओ । जया उदयमागया ॥ तया इच्छित्तणं पत्तं । सम्मं जाणाहि गोयमा ॥ १ ॥ पुनरप्युक्तं—दर्शने हरते चित्तं । स्पर्शने हरते बलं ॥ संगमे हरते वीर्यं । नारी प्रत्यक्षराक्षसी ॥ १ ॥ इति. अतो नाहं ललितांगवन्मोहनिमग्नोऽशुचिकूपे भवकूपे निवसामि, तदा स्त्रीभिरुक्तं स्वामिन् कोऽयं ललितांगो यः स्वामिनोपनयं नीतः, जम्बूकुमारः कथयति वसन्तपुरे नगरे शतप्रभो राजा राज्यं करोति, तद्गृहे रूपवती नाम्नी पट्टराज्ञी, साऽतीवरूपवती यौवनादिगुणाकीर्णा मोहनृपराजधानी राज्ञोऽतीववल्लभा, परन्तु सा व्यभिचारिणी, एकदा सा रूपवती गवाक्षस्थिता नगरकौतुकं विलोकयति. तस्मिन्नवसरे ललितांगनामा कश्चिद्युवाऽतीवरूपपात्रं मार्गे गच्छंस्तया दृष्टः, तद्रूपदर्शनाज्जातमोहोदयाऽतीवकामातुरा रूपवती चेटींप्रति भो एनं युवानमानय ? तया तस्मै निवेदितं मदीया स्वामिनी त्वामाकारयति, अतः समागच्छ मया सार्द्धं मत्स्वामिनीगेहं ? सोऽपि विषयभिक्षापरिभ्रमण-



P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

शीलो निःशीलस्तद्गेहं जगाम. साऽप्यागतं ललितांगं दृष्ट्वा हावभावविलासविभ्रमान् विस्तारयन्ति, अंगमोटनं कुर्वंती, दोर्मूलं दर्शयन्ती, नाभिमन्डलं विवसनं कुर्वंती तदीयं मनो वशीचकार. यदुक्तं—स्त्री कांतं वीक्ष्य नाभिं प्रकटयति मुहुर्विक्षिपंति कटाक्षान् । दोर्मूलं दर्शयंती रचयति कुसुमापीडमुत्क्षिप्तपाणिः ॥ रोमांचस्वेदजृंभाः श्रयति कुचतटस्रंसि वस्त्रं विधत्ते । सोल्लंठं वक्ति नीवीं शिथिलयति दशत्योष्टमंगं भनक्ति ॥ १ ॥ तदीयमेतत्स्वरूपं दृष्ट्वा स्मरोल्लंभितांगो ललितांगनामा तया सार्द्धं भोगान् बुभुजे, विषयलुप्तचेतनो निःशंकतां भुक्तवान्. एतस्मिन्नवसरे तदीयो भर्त्ता राजा समायातः, तदा द्वारस्थितचेटीमुखाद्राजागमनं श्रुत्वा साऽतीवभयविह्वलांगी तं नरमशुचिकूपे स्थापयामास आगते राज्ञा सार्द्धं च हास्यविनोदादिवार्त्तां चकार. सोऽपि ललितांगोऽशुचिकूपे स्थितो महतीं क्षुत्तृषादिबाधां सहते, परवशो जातः, मनसि चिंतयति अहो ! विषयलांपट्यं ! धिग्मामकृत्यकारिणं ! एवं तत्र वसतो बहूनि दिनानि जातानि. सा राज्यपि तं विसस्मार, धिक्स्त्रीणां कृत्रिमं प्रेम ! ललितांगस्तत्र तिष्ठन् मृततुल्यो जातः, वर्षाकाले जलपूरिताऽशुचिकूपजलप्रवाहेण वाहितो निर्गतो मिलितः स्वजनानां, निवेदितं सर्वमपि स्वरूपं, विषयाभिलाषविमुखो जातः, कियद्भिर्दिनैर्गृहे स्वस्थीभूतः पुनरेकदा राज्या दृष्ट उपलक्षित आकारितश्च. ललितांगेनोक्तं न पुनरेवं करिष्यामि, विषयासक्तेन महती मया वेदनाऽनुभूतेति. ततः परं विषयविरक्तो भूत्वा स सुखी जातः, अतो भो वनिता यद्यहं विषयासक्तो भवामि तदा ललितांगवद्दुःखभाजनं स्यां अतो न रते रतिः कर्त्तुं युक्तेति ललितांगदृष्टांतः ॥ एवं कुमारेण शिक्षा दत्ता, एवं परस्परमुत्तरप्रत्युत्तरवाक्यै रजनी निर्जगाम. पश्चात्स्त्री-

जा० के० ली० कोबा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भिरुक्तं, स्वामिन् दुष्करं व्रतपालनं, अनुपमोऽयं वैराग्यरसः, यैरयं सम्यगाराधितस्तैर्मुक्तिपदमलंकृतमिति स्त्रीभिरपि जम्बूवचः प्रमाणीकृतं। तस्मिन्नवसरे प्रभवेणोक्तं मदीयं महद्भाग्यं यच्चौरेणापि मया वैराग्यवार्त्ता श्रुता. विषमोयं विषयाभिलाषः, दुस्त्यजोऽयं विषयरागः, धन्यस्त्वं येन तारुण्येऽपींद्रियाणि वशीकृतानि. जम्बूकुमारेणापि तदुद्वाराय बहवो धर्मोपदेशा दत्ताः, वैराग्यवासितेन प्रभवचौरेणोक्तं त्वं महान् ममोपकारकर्त्ता, अहमपि त्वया सार्द्धं व्रतं गृहीष्यामि. प्रातःकालो जातः. कोणिकेन राज्ञा तत् श्रुतं, कोणिकेनापि बहवो रक्षणोपायाः कृताः, परन्तु जम्बूकुमारेण मनसि न धारिताः, पश्चात्प्रातः समहोत्सवं सप्तक्षेत्र्यां वित्तं वितीर्य कृतकोणिकनृपोत्सवः प्रभवादिपञ्चशतीपरिकलितो निजजनकजननीसहितः प्रमदाभिरनुश्रितो निजश्वशुरश्वश्रूसंयुतः श्रीसुधर्मस्वामिनः समीपे चारित्रं जग्राह. अनुक्रमेणाधीतद्वादशांगीकश्चतुर्दशपूर्वधारी चतुर्ज्ञानसहितः स श्रीसुधर्मस्वामिपट्टभूषणं जातो, घातिकर्मक्षयात्केवलमवाप्य मुक्तिकामिनीकंठालंकारहारः सञ्जातः, धन्योऽयं सुरराजराजमहितः श्रीजम्बूनामा मुनि—स्तारुण्येऽपि पवित्ररूपकलितो यो निर्जिगाय स्मरं ॥ त्यक्त्वा मोहनिबन्धनं निजवधुसम्बन्धमत्यादरा—न्मुक्तिस्त्रीवरसंगमोद्भवसुखं लेभे मुदा शाश्वतं ॥ १ ॥ एवं जम्बूसदृशः क्षणभंगुरं विषसुखं त्यक्त्वा शाश्वत एव सुखे रमंते, तत्प्रत्ययेन प्रभवसदृशा अपि सुलभबोधिनः संसारांबुधिपारगा भवन्तीति.

॥ इति श्रीजम्बूकुमारचरित्रं सम्पूर्णं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ इति श्रीजम्बूकुमारचरित्र समाप्तः ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust